# बुद्धस्य चत्वार्यार्यसत्यानि

सुजितपरामानिकः

## भूमिका

सर्वेषां दर्शनानां चरमं लक्ष्यं भवति मोक्षः निर्वाणं, कैवल्यं वा। यतो हि जन्म प्राणिनां दुःखकारणम्। तद्दुःखं जिहासितुं सर्वानि शास्त्राणि प्रवृत्तानि। जीवः वस्तुतः स्वपुण्यपापकर्मानुसारेण सुखदुःखञ्चानुभवति। जीवस्य दुःखं भगवतापि न सह्यते, अतः जीवान् उद्धर्तुं भगवानस्मिन् धराधामे वारं वारम् अवतरति। एवं जीवान् उद्धर्तुं भगवतः बोधिसत्त्वस्यापि अवतरणमस्मिन् धराधामे। बुद्धवचनस्य तात्पर्यं दर्शने नासीत्। दर्शनविषये स सदा सर्वदा मौनमवलम्बितवान्। कारणं हि स सम्यक्तया जानाति स्म यत् दर्शनतत्त्वप्रतिपादने जीवैः दुःखं न परिहार्यते। जीवस्य दुःखाद् मुक्तये सोऽपि निरन्तरः प्रयतमान आसीत्। तस्योपायरूपेण साधननिमित्तं तेन चत्वार्यार्यसत्यानि प्रोक्तानि सन्ति। एतानि आर्यसत्यानि बौद्धानां निर्वाणलाभस्योपायः दुःखजिहासस्य मुख्यसाधनानि। तानि चत्वार्यार्यसत्यानि तावत् दुःखं, दुःखसमुदायो, दुःखनिरोधो, दुःनिरीधमार्ग इति।

## दुःखम्

चतुर्षु आर्यसत्येषु दुःखमिति प्रथममार्यसत्यम्। बुद्धो दार्शनिकप्रश्नस्य विवेचनं न कृत्वा साक्षात् सारनाथः इत्यस्मिन् स्थाने भिक्षुकं प्रति आर्यसत्यानि उपदिष्टवान्। तस्य वक्तव्यमासीत् संसारे दुःखमेवास्ति, दुःखेन संसारस्था जनाः सन्तप्ताः सन्ति। अत आदौ तस्योपायः अन्वेष्टव्यः तद्विहाय यदि दार्शनिकतत्त्वानामन्वेषणा क्रियते तर्हि तद् मुर्खस्य परिचायकः। यथा कोऽपि बाणेन विद्धो भवति तत्र यदि बाणस्योत्पाटनं न कृत्वा केन बाणेन विद्धोऽहं , कः बाणं क्षिप्तवान् क्षत्रियः उत ब्राह्मण, कस्मात् क्षिप्तवान्, किमर्थं क्षिप्तवान् इत्यादिषु प्रश्नेषु सत्सु प्रश्नस्य सार एव न तिष्ठति। स प्रश्नो मुर्खस्य प्रश्न इव प्रतिभाति। भगवान् बुद्धो दार्शनिकतत्त्वेषु आत्मा ईश्वरः कार्यं, कारणम् इत्यादिषु प्रश्नेषु मौनमेवावलम्बितवान्। वास्तवे बुद्धस्य दर्शनं नासीत् तस्य नीतिशास्त्रमेवासीत्। तत्र आर्यसत्यानां सिद्धान्ते व्यवहारस्य अनुपमः समन्वयोऽस्ति। भगवतः बुद्धस्य मते जगति सर्वं दुःखमेवास्ति। जगज्जीवनञ्च सर्वं दुःखमयं, जन्मन आरभ्य मृत्युः पर्यन्तं सर्वं दुःखमयं, जन्म दुःखं, जरा दुःखं, व्याधिः दुःखं, मृत्युः दुःखम्, अप्रियसंयोगं दुःखं, प्रियविच्छेदं दुःखं पञ्चोपादानं स्कन्दमयमिदं शरीरं, मनः सर्वं दुःखपूर्णम्।

## दुःखसमुदयः

चतुर्षु आर्यसत्येषु द्वितीयमार्यसत्यमस्ति दुःखसमुदयः। समुदय इत्यस्यार्थः कारणमिति। वस्तुतो दुःखसमुदयो नाम दुःखस्य कारणम्। कारणं विना कार्यस्यास्तित्वं नास्ति। कार्यकारणयोः नियमोऽच्छेद्योऽस्ति। यतो हि जगति दुःखमस्ति अतस्तस्य कारणमपि अवश्यमेवास्ति। दुःखं भवति कार्यम्। जगत्यकस्मादकारणेन किमपि न भवति। कार्यमात्रमेव सापेक्षं भवति। किञ्चिदाश्रित्यैव कार्यमुत्पद्यते। बौद्धानामिदं सत्यं प्रतीत्यसमुत्पादननीते उपरि प्रतिष्ठितमस्ति। दुःखस्य कारणं भवति अविद्या, तज्जन्यमासक्तिः तृष्णा। भगवान् बुद्धो भिक्षुकान् अवदत् यत् हे भिक्षुकाः दुःखसमुदयो द्वितीयम् आर्यसत्यमिति। दुःखस्य वास्तिविको हेतुः भवति तृष्णा, यद् वारं वारं मनस्युत्पद्यते। रागेन विषयवस्तु युक्तो भवति तेन रागेन पुरुषः स्वस्य तृप्तिनिमित्तं यत्र तत्र सर्वत्र स्वतृप्तिमन्वेषति। सा तृष्णा प्रकारत्रयमस्ति यत् कामतृष्णा, भवतृष्णा, तथा विभवतृष्णा इति।

## दुःखनिरोधः

आर्यसत्येषु तृतीयमार्यसत्यमस्ति दुःखनिरोध इति। निरोध इत्यस्य शब्दस्यार्थः नाश उत त्यागः। दुःखं जिहासितुं शक्यते, दुःखस्य अन्तोऽस्ति। अस्य सत्यस्योपरि भगवान् बुद्धोऽवदत् यत्- "हे भिक्षुकाः दुःखनिरोधः तृष्णायाः अशेषसम्पूर्णवैराग्यः, तृष्णाया त्यागः प्रतिसर्गो मुक्तिः तथा अनालयः"। पृथिव्याः यत् किमप्यस्ति तद् सर्वमनित्यम्। यस्योत्पत्तिः अस्ति तस्य विनाशोऽपि अस्ति- "यद् यदुत्पत्तिमत् तत्तद् विनाशि" इति। सर्वत्रैव कार्यकारणसम्बन्धोऽनुस्यूतोऽस्ति। यदि कारणस्य नाशो भवति तर्हि कार्यस्यापि नाशो भवति। तृष्णा अविद्याग्रस्थस्य दुःखस्य कारणम्। अतस्तृष्णायां निरोधायां सत्यां तृष्णाजन्यकार्यरूपजरामरणादिदुःखमपि नश्यति। न्यायशास्त्रे उक्तमस्ति यत् कारणापाये कार्यस्यापायः। यथा मिथ्याज्ञानस्यापाये दोषापायः, दोषस्यापाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मनोऽपायः किञ्च जन्मनोऽपाये दुःखस्यापाय इति। तृतीयार्यसत्यसम्बन्धे भगवतो बुद्धस्य कथनमस्ति यत् - "यतो हि संसारे दुःखमस्ति तथापि तस्य निवृत्तिरपि सम्भवति"। दुःखनिरोध एव बौद्धानां मते निर्वाणमिति। तत् निर्वाणं स्वप्रत्यात्मवेदनीयम्। केवलं सिद्धपुरुषाः तेषाम् अन्तरे निर्वाणमनुभवन्ति। केवलं तृष्णात्यागेन जीवितकाले एव पुरुषः तत् स्वरूपं स्वतः प्राप्तुं शक्नोति।

## दुःखनिरोधगामिनी प्रतिपद्

आर्यसत्येषु चतुर्थार्यसत्यं भवति दुःखनिरोधगामिनी प्रतिपद्। प्रतिपद् इत्यस्यार्थो मार्गः। यदि च गन्तव्यं स्थानं भवेत् तर्हि तस्य मार्गोऽपि अवश्यमेव स्यात्। बौद्धानां मते निर्वाणं सर्वेषां प्राणिनां प्राप्तव्यं स्थानम्। अतः तन्निमित्तं मार्गकल्पनं न्यायसंगतमेवास्ति। एतस्य मार्गस्य नाम अष्टाङ्गिकमार्ग इति। अष्टाङ्गिकमार्गो बौद्धानां धर्माचारमीमांसायाः चरमं साधनम्। यदि पुरुष एतं मार्गमाश्रयति तर्हि स दुःखं नाशयित्वा परमं शान्तिस्थानं निर्वाणं प्राप्नोति। धम्मपदेऽपे उक्तमस्ति यत्- "मग्गानट्ठङ्गिको सेट्ठो" ("मार्गाणामष्टाङ्गिकः श्रेष्ठः") इति। बुद्धस्य अष्टाङ्गिमार्गे सर्वत्र "सम्यक्" इति विशेषणं योजितमस्ति। तर्हि इदानीं प्रश्नः समुदेति यत् कस्यां दशायां सम्यक् इति कथनं भवति। तस्मिन् विषये मतमस्ति यत्- अन्तस्य मध्यता एव सम्यक्ता इति। अर्थात् कस्मिश्चित् विषये अत्यधिकत्वं किञ्च न्युनत्वम् अल्पत्वं वा न युक्तम्। यथा उदाहरणरूपेण अत्यधिकं भोजनं शरीरस्य कष्टदायकं भवति तद्वत् न्युनत्वमपि। अत उभयोः मध्यभाग एव आश्रनीयः तदेव प्राणिनां श्रेयःकारको भवति। एवं मध्यममार्गस्य अधिकमहत्त्वत्वात् बुद्धस्य मार्गो मध्यमप्रतिपदा मध्यममार्ग इत्यभिधीयते इति "मग्गानट्ठङ्गो सेट्ठो सच्चान चतुरो पदा। विरागो सेट्ठो धम्मानं द्विपदानाञ्च चकखुम"॥ इति। बौद्धानाम् अष्टाङ्गिकमार्गाः दुःखस्य आत्यन्तिकनिवृत्तेः उपायः। जीवस्य पारमार्थिकल्याणाय बुद्धस्य चतुर्थार्यसत्यस्योपदेशः। बुद्धस्य अष्टाङ्गिकमार्गः चतुर्थार्यसत्ये अन्तर्भवति। दुःखनिरोधमार्गः अष्टाङ्गिकमार्गः। दुःखनिरोधमार्गस्य अष्टौ अङ्गानि सन्ति यथा सम्यक् दृष्टिः, सम्यक् संकल्पः, सम्यक् वाक्, सम्यक् कर्मान्तः, सम्यक् आजीवः, सम्यक् व्यायामः, सम्यक् स्मृतिः. किञ्च सम्यक् समाधिः। एतेषां सम्यक् अनुष्ठानेन पुरुषस्य निर्वाणप्राप्तिः भवतीति।

## उपसंहृतिः

एतानि चत्वारि आर्यसत्यानि यथायथतया पाल्यन्ते चेत् पुरुषः निर्वाणं प्राप्स्यति। तेन संसारूपदुःखस्य समूलविनाशो भविष्यति। पुरुषः स्वस्वरूपं प्राप्नोति,. किञ्च परमसुखं परमानन्दञ्च प्राप्नोति। साधनं सम्यक्तया परिपाल्यते चेत् साध्यं स्वत एव सिध्यति। पुरुषैः साध्यं स्थिरीकृत्य साधने एव यत्नः करणीयः। अतो भगवान् बुद्धोऽपि दार्शनिकतत्त्वे आदरं न चकार। तस्य दृष्टिः परमसाधनैवासीत्। तस्य मते दार्शनिकतत्त्वे केवलं विचार एव भवति। तेन नाना गतिः तर्कमूलकविचारा एव सिध्यन्ति न तु परमसाध्यम्। तस्मात् स साक्षात् भिक्षुकान् परमसाध्यस्य कृते परमसाधनमुपदिष्टवान्। बौद्धानाम् एतानि चत्वार्यासत्यानि इतरेषु दर्शनेषु समानतया दृश्यन्ते। दुःखं जिहासार्थमेव अन्येषामपि शास्त्राणां तथा दर्शनानां प्रवृत्तिः। जननमरणजराव्याधिरूपं यत् दुःखं तस्योपशमनं साधनस्य मूललक्ष्यमिति। तदेव भिन्नेषु भिन्नेषु शास्त्रेषु आस्तिकनास्तिकदर्शनेषु प्रतिपाद्यते।